International Journal of Sanskrit Research 2016; 2(3): 83-87

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2016; 2(3): 83-87
© 2016 IJSR
www.anantaajournal.com
Received: 16-03-2016
Accepted: 17-04-2016

**श्री राजेश कुमार,**
शोधच्छात्र, राष्ट्रीय संस्कृत संस्थान,
नई दिल्ली, भारत

**Correspondence**
**श्री राजेश कुमार,**
शोधच्छात्र, राष्ट्रीय संस्कृत संस्थान,
नई दिल्ली, भारत

# अभिराजराजेन्द्रमिश्रस्य गलज्जलिकासु आत्मिकी/वैयक्तिकी संवेदना

## श्री राजेश कुमार

### भूमिका

साहित्यं समाजस्यदर्पणं भवति। समाजे वर्तमानां परिस्थितीनां वर्णनं तत्रावश्यं भवति। को॰पि साहित्यकार: स्वजीवनयशोगाथां न वर्णयति परन्तु तस्य साहित्ये॰लंकारादिभि: उपमादिभि: कवेर्जीवनस्य विविधायामा: वर्णिता: भवन्ति। स्वजन्मत: मृत्युपर्यन्तं कवि: जीवने यदाप्नोति यन्न लभते तत्समेषां वर्णनं साहित्ये केनापि प्रकारेण वर्ण्यते। आचार्यराजेन्द्रमिश्रस्य सम्पूर्णजीवनं संघर्षपूर्णं वर्तते। पितृहीनतायै मातृत्वसंवेदना (माता जीवने यानि कष्टानि सोढानि) कविमनसि हृदये च स्वाधिपत्यं करोति। कविराजराजेन्द्रस्य गलज्जलिकासाहित्यं समीक्षया अहं तेषां जीवनस्यात्मिकवर्णनं (स्वविषये) कर्तुं प्रयास: करोमि। तेन तेषां साहित्ये वर्णितान् विषयाननुसृत्य वयं कवे: वैयक्तिकसंवेदनामवलोकयाम:।

कवि: बाल्यकालं स्मरन् स्वमातु: अङ्कस्य वर्णनं करोति। बाल: शैशवावस्थायां मात्रङ्के रोचते। तत्र शयनस्य कारणमस्ति बाल: भयरहितो भूत्वा सुखेन शयनं कुर्यात्। एतत्सुखं बाल्य एव लभते। अत: कवि कथयति आतंकरहिता (भयमुक्ता) मातु: अङ्क: कुत्रगत: चुम्बानां मधुरिमा कुत्र गता? यौवने॰पिता माता बाले स्निह्यति परं बाल्यवन्न भवति।

> प्रसुप्तं निरातङ्कमङ्के जनन्या:
> क्व याताधुना माधुरी चुम्बनम्।।[1]

मानवजीवनं कष्टानामापदं वर्तते। अनेके जना: कष्टान्यपसार्य स्वजीवनयात्रां सुपथगामिनी कुर्वन्ति। किन्त्वनेके जना: यादृशा अपि भवन्ति ये स्वजीवनकष्टं सोढुमसमर्थो मत्वा स्वजीवनं घ्नन्ति। मानवजीवनं जीवनाय वर्तते न तु हननार्थम्। भारतीय परम्परायामपि आत्महननं पापकर्म मतम्–

> असूर्या नाम ते लोका: अन्धेन तमसा वृता
> तास्ते प्रेत्यापि गच्छनित ये के चात्महनो जना:।।[2]

कवि: मानसिकाप्रसन्नताया व्यथितो कथयति क्व रूचिरं स्थानं गन्तव्यं यत्र सुखं लभतु / मराणतु नैवास्ति यतोहि जीवनं न हन्तव्यमस्ति। महर्षि: दधीचिना स्वास्थीनि इन्द्रायास्त्रार्थं (तारकासुखवधार्थम्) दत्तानि। परन्तु वर्तमानसमये को॰पीन्द्रवत् कवे: अस्थीनि न याचते नैव तु स: स्वास्थीनि दत्त्वा जीवनमुक्तो स्यात्। अत: जीवनं सुचिन्तनेन सुविचार्य कस्मै ददानि? प्रारम्भिकसमये आचार्यस्य काव्यं सम्मानं नावाप्नोत्। तेन व्यथित: कवि राजाभोजं स्मरति य: कवीनां प्रशंसको आश्रयदाता चासीत्। को॰पि मालेवश्वर: (राजनेतार:) मां न पुरस्करोति। काव्यं विधाय कं श्रावयानि? को॰पि राजकन्या (मध्यं) मां न निन्दयति । तु कालिदासो॰भवम्। अनेन प्रतीयते यत् वैवाहिक सम्बन्धेऽपि राजेन्द्रमिश्र: काठिन्यमनुवभवन्। केचन जना: अभिराजं (तस्य

काव्यम्) निन्दयन्ति। परं ते निन्दका: स्वयन्तु काव्यं न जानन्ति तर्हि स्वकाव्येन कथं कवित्वं सिद्धयेयम्। महाराजहर्षदेवेन निन्दितो भूत्वा महाकवि: बाणभट्टेन स्वकाव्यप्रतिभया हर्षदेव हतप्रभ: कृतमासीत् तादृशा: हर्षदेवा: (आचरणेन वर्तन्ते) न दृश्यन्ते। अत: कवि: स्वकाव्यं कं श्र ावयेत्? द्वापरयुगे विरहण्य: विरहशमनाय मुरारिमाश्रयन्ते (कृष्णाश्रितो भवन्ति) स्म। अस्मिन् विकराले कलिकाले कोऽपि मुरारिरपि (कृष्ण:) न दृश्यते यस्मिन् व्यथितं मन: रमाणि। सम्पूर्णजीवनं अरण्याग्निवत् वर्तते। सर्वत्र शत्रु: (वर्तन्ते) विद्यमाना: सन्ति निर्भयो भूत्वा कुत: प्रवेशयानि? तुच्छप्राणिनोऽपि कष्टसमये कष्टं ददति। (धूर्ता: मूर्खा अपि तुदन्ति) हन्त! तृणमपि हन्तुं समर्थं जातम्। अधुना कस्मै विश्वासं विधाय मानसिकशान्तिं (लभेयम्) प्राप्नुयाम्। मनोवेदनाया: चरमोत्कर्षे ईश्वरं निवेदयति हे भगवन्! कीदृशं जीवनं दत्तं त्वया न भोक्तुं शक्नोमि न च हन्तुं समर्थोऽस्मि चर्चा विचारार्थमपि कोऽपि न वर्तते येन मनोवेदना शान्ता स्यात्। अत एव कवि: कथयति एनं हृदयसिन्धुं कोऽपि न मथेत् तु मंथनोद्गतममृतं कथं पिबानि अर्थात् मन: कथं शान्तं स्यात्?

क्व नु रूचिरं विशोध्य गन्तव्यम्?
जीवनं वर्तते न हन्तव्यम्।।[3]

"मेरा जीवन कोरा कागज कोरा ही रह गया" इतिभारतीयचलचित्रस्य गीतवत् कवि: स्वजीवनमलिखितं मन्यते तत्रकारणं लेखन्या: अभाव वर्तते इति कवि: विचार: यद्यपि मानवजीवनरूपीकर्गदं तु प्राप्तम् परन्तु जीवनतुलिका प्राप्तायै असमर्थो अभवम्। जीवनं लिखितुं सहायकसामग्रीणामभावेन (जीवनोपयोगी पदार्थाणामभावेन) जीवनं सम्यक्तया न प्रचलति। कवि: स्वाभावावस्थां वर्णयति अर्थात् कविना स्वजीवनाय यानि स्वप्नानि दृष्टानि तानि न पूर्णितानि। आचार्य: स्वलक्ष्यप्राप्तुमसमर्था अनुभवति स्वजीवनलक्ष्यं साधयितुं केचन जना छलछदमाचरन्ति तेन विजयं प्राप्य विजेताऽहमनुभवामि। तै: छलित: कवि: स्ववेदनां प्रकटयति अन्येषां छलेन प्राप्तं विजयं दृष्ट्वा मम जीवनं सान्त्वनायै समर्थो नाभवत् अर्थात् मन: व्यथितं जातम्।

कवि: वेदनाशान्तायै वर्तमानमेव जीवितुं प्रयतते। अत: स कथयति यथा अतीतं न चिन्तितं न च भविष्यं चिन्तयामि मया तु केवलं वतर्मानमङ्गीकृतम् अर्थात् वर्तमानविषय एव चिन्तयामि यद्भूतं तद् चिन्तयित्वा दु:खमेवोत्पद्यते। भविष्यचिन्तनेन वर्तमाननाश: जायते। अत: वर्तमानमेव जीवनीयम्। कवि: चिन्तयति यत् (अनेके विद्वांस: कथयन्नासीत् यत् तव काव्यं मधुरं नास्ति) मधुरताया: त्यागस्तु मया न कृत:। अमृतघटे स्थितं विषं दृष्ट्वा मया माधुर्यं त्यक्तम्। जना: माधुर्यवचनेन विषमुच्चारयन्ति अर्थात् पुरत: मधुरं वदन्ति पृष्ठे च विषवत् क्लेदयन्ति तापयन्ति वा। अत एव कवि: माधुर्यमावश्यकम्। श्रवणाय कटुकं भवति। अत: मया (कविना) वाचि माधुर्यम् त्यक्तं माधुर्यं 'थू' इति कृतम्।

मानसिकव्यथाग्रस्तो कविराज: जीवने प्राप्तानि छलछद्मादीनि स्मरन् तस्या: वेदनां वर्णयति, किं मधुरं स्मराणि? किं कटुकं विस्मरानि? स्वयमेव स्मरणभाजनं जीवामि भूतलेऽहम्। अर्थात् जीवने किञ्चिदपि यथा न जातम् यं स्मृत्वानन्दं भवेत्। अपरश्च जीवने सर्वमेव कष्टप्रदं व्यतीतं तत्कष्टं यथासीत् यत् विस्मरितेऽपि न विस्मरानि। मामेव स्मरन्ति जना: उपहसन् ये जना: मया सहावज्ञया व्यवहरन्ति ते वास्तविकतां न जानन्ति। मम सत्यं जिज्ञासु अवश्यमेव भविष्यति। कवि: नैराश्ये कथयति यत् ये मामुपहसन्ति ते मां सम्यग्तया न जानन्ति। कवि: तत्समयं वर्णयति यदा मानसिकवेदना महती जाता। तदवस्थामवाप्यान्ये जनास्तु परलोकं गच्छन्ति। कष्टस्य प्रभावेण जीवनं मृत्युवत् प्रतीयते मृत्यु: कथं न भवतीति तु कविराज: मृत्युं व्यंग्यन् कथयति मृत्युबाला यमराजस्य भवने कुत्रापि भ्रान्ता जातेत्यहं मन्ये। तदैवहं जगत्यस्मिन् जीवामि–

मन्ये कृतान्तगेहे भ्रान्तास्ति मृत्युबाला।
यस्मादहोऽभिराजे जीवामि भूतलेऽहम्।।[4]

मनसि यत्, तत् वाचि, वाचि यत् तत् कर्मणि भवितव्यं परमधुना सर्वे वाचि यद् भवति तत् कर्मणि न व्यवहरन्ति किन्तु कविना कदापि तथा नाचरितं यथा मनसि वाचि भिन्नता स्यात्। एतादृशं व्यवहार ं(यथा वाचि तथा मनसि कर्मणि) स्वोन्नतौ अवरोधं मन्यते। अत एव कवि: कथयति युगेऽस्मिन् मत्सदृशानामुन्नति: कथं भवितुमर्हति। येन (मया) मनसि अन्यत् विधायाचरणादन्य: न व्यवहृत:। लज्जा मनुष्याभूषणं विहितम्। आचार्येण राजेन्द्रेण लज्जाभूषणं कदापि न व्यक्तमत एवाद्य किमपि न प्राप्तम्। वर्तमानसमये देववन्दनायै किमपि न लभ्यते परन्तु लोकवन्दनायै सर्वं लभ्यते। अत एव कवि: कथयति अभिराजस्य देववन्दना निष्फला जाता परन्तु ताभि: वन्दनाभि: परितोषेण मनुष्येण सर्वेच्छा पूर्णा कृता।[5]

यदा मनोऽशान्तं भवति तदा किमपि न रोचते। तदा सर्वत्र दु:खेमेवानुभूयते। आचार्य: कविराजोऽपि एतामवस्थामन्वभवत्। अत एव कथयति भावैराकुलं किंकर्त्तव्यमूढं मम मन: अशान्तं वर्तते। न जानेऽहं यत् जगदिदं कथं दुर्विषमिव प्रतीयते अर्थादाचार्यस्य मन उद्विग्नमासीत् येन सर्वाशान्तिरनुभूयते।[6]

अग्नौ तप्त्वा स्वर्णं स्वर्णत्वमाप्नोति तथैवाचार्येणापि चित्तौ दग्धीभूय देदीप्यमाना स्वर्णता प्राप्ता। अर्थादाचार्येण यत्किमपि प्राप्तं तत्सर्वं स्वपरिश्रमेण प्राप्तम्। तदर्थमनेका: विपदापि सोढा। तत्विपत्तिषु तप्त्वैव 'अभिराजो जात: राजेन्द्र:। कवि: निर्धनतां स्वाश्रुबिन्दुभि: रचितेन हारेण दहति। अत एवोक्तं मया कुबेरगृह (धनपतिगेहे) जन्म न लब्ध: तथापि नयनाश्रुमौक्तिहारेण नाशिता दरिद्रता। कवि: स्वजीवनं सद्गुणरहितं मन्यते तस्मिंस्तु दोषा: एव विद्यन्ते तथापि रसिकै: ममाभद्रता सोढा अर्थात् रसिकै: जनै: सामान्यं काव्यं श्रुत्वापि प्रशंसितम्। कवे: काव्यं दोषयुक्तं वर्तते इति स्वयमेव स्वीकरोति। तद्दोषा: काव्येन नष्टा: वेणु: छिद्रयुक्तो भवति परं स: स्वमाधुर्यध्वनिना अनर्थक ं(छिद्रत्वं) विलोपयति तथैव कवे: दोषा: काव्येन विलुप्ता: जाता। आचार्यकाव्यपाठेनानेक जना: दु:खीयन्ति तान् व्यंग्यन् कवि: काव्यनिन्दकान् वर्णयति सभायां काव्यपठनाय विद्यमाने सति कवित्वद्रोहिण: (अरसिका:) दु:खीयन्ति।[7]

स्वभार्याया आरम्भिकावस्थां वर्णयन् कवि: व्यंग्यति मया या मितभाषिणी सरला मता सैव सर्पिणीवत् वक्रत्वं धारयति। आचार्य: स्वगृहस्थजीवनेनाधुना सन्तुष्टो दृश्यते तथाप्येषा गलज्जलिका भार्या व्यंग्यन् लिखितमाचार्येण।[8]

आचार्यमिश्रस्य जीवनं परोपकाराय व्यतीतम्। स्वजीवनलक्ष्यं वर्णयति कवि:। यज्ञे आहुतं हवि: धूम्रेण परिवर्त्य आकाशं गत्वा पुन: मेघं रचयति मेघाश्च वृष्टिं कृत्वा पुन: हविरेवोत्पादयति। तथैवाचार्य: अन्यै

दत्तैः दग्धीभूय यज्ञधूमवत् प्रसन्नतामेवोत्पादयति। पृथ्वी वृत्ताकारा वर्तते तथैव मानवजीवनमपि मृत्युः जन्म, मृत्युः जन्म पुनर्पुनः जायन्ते। आचार्यः स्वजीवनविषये कथयति यदेतज्जीवनं यत् आरब्धं पुनश्च तत्रैवागमिष्यामः। संख्यासु शून्यं महत्वपूर्ण स्थानं भजते। अङ्कमनु संयोज्य संख्या वर्धयन् अनन्ततां प्राप्नोति। तथैव कविरपि स्वंशून्यवत् वर्णयति केचन कथयन्ति यत् अभिराजः किमपि न वर्तते अर्थात् शून्यमस्ति। तथापि कविः कमपि न दोषयति यतो हि शून्यं भूत्वा काव्यशिखरमारूढयिष्यामि। कविः पुष्पवन्न वर्तते स तु वसन्तस्य सुगन्धं वर्तते यत्प्रत्येकहृदयेषु सुगन्धिवत् जीवनं सुरभीकरोति। यथा तिलेषु प्रहारेण तैलं पृथक् भवति खलञ्च पृथक् अर्थात् प्रहारेण तिलानि स्वसम्पूर्णस्नेहत्व ं(तैलम्) त्यजन्ति परं कविः अनेकप्रहारेष्वपि स्वस्नेहत्वं न त्यजति अर्थात् धूर्तालोचनाभिः दुष्टनिन्दाभिः कविः स्नेहं न त्यजति अपितु सः सर्वार्थं स्नेहं (काव्येन) किरति।

अपि हविर्भूता मखाग्नौ धूतां यामो वयम्।
धूमतो घनतां गता हविरेव जनयामो वयम्।।[9]

आचार्यराजेन्द्रमिश्रेण स्वजीवने·नेकानि कष्टानि सोढानि। कष्टानि सोढ्वापि एते कदापि विचलिताः नाभवन्। कविः कथयति मया वैशद्यमवाप्तुंज्वलदग्निपिण्डैः सह क्रीडितं जीवनाय संघर्षं निर्वहन् चिरं सोढम् अर्थात् आचार्यस्य जीवनं संघर्षपूर्णं वर्तते। बाल्ये पितुः अभावः मातुः वैधव्यम् योग्यतानुसारेण सम्मानं न इत्यादीन्यनेकानि कारणानि सन्ति यैः तेषां जीवनं संघर्षरतो जातम्।

वैशद्यमाप्तुं ऽवलदनलपिण्डैर्मया संक्रीडितम्।
सोढं, चिरं सोढं, धृतं संघर्षनिव है जीवितम्।।[10]

कविः श्रृङ्गारेण स्वभार्यां वर्णयति। अहन्तु काव्यसाधनायां निमग्नोऽऽसम् परन्तु मेनकावत् त्वया कुटीरं समागत्य भग्ना मे साधना। मेनकया अप्सरया विश्वामित्रस्य तपस्या स्वरूपलावण्येन भग्ना कृतासीत् तथैवाचार्यः कथयति मम जीवनेऽपि ममप्रिया (पत्नी) मेनकावत् समागता। रूपसौन्दर्यं प्रशंसयन् कविः स्वभार्यां प्रशंसयति तव रूपसौन्दर्यस्य यशोगाथाश्चर्चिते सति चातको भूत्वा मे मनः लग्नम् अर्थात् सर्व एव तां प्रशसयन्ति स्म। यथा पूर्णचन्द्रे सति समुद्रः पूर्णोद्वेगेन (पूर्णसाहसेन) तं प्राप्तुं प्रयतते तथैवाचार्योऽपि कथयति तव पूर्णिमायाश्चन्द्रवत् मुखं विलोक्य मम मनः सागरीभूय लग्नम्। स्त्रीसौन्दर्ये कटिः विशिष्टस्थानं भजते। कृशकटिः श्रेष्ठः मन्यते। आचार्यः कथयति कटिः वर्तते न वा वर्तते इति वाद करधनीभूयोऽहं (मम मनः लग्नम्) अवस्थितम्।[11]

कविः स्वगृहस्थजीवनं वर्णयन् भार्यां प्रशंसयति। मृगशावकवत् काननेऽटित्वा गृहमागतं तदा कुशैः कल्पिते व्रणयुक्तमुखे तव दृष्टिना अतिविषा लिम्पिता (व्रणपूरयितौषधी) कविः कथयति यदा पूर्णदिवसे कार्ये लग्नः रतः श्रान्तः गृहमागतोऽहं तदा त्वया स्नेहेन दृष्टा तु तथैवापगता क्लान्तिः यथौषधेन व्रणनाशो जायते। अपरः पक्षः पूर्णदिवसे कविः धूर्तैः जनैः तुदितो यदा सायं गृहं प्रत्यागतः तदा भार्या स्वस्नेहेन तद्दुःखमपसारयत्। न जाने कति वर्षाणि व्यतीतानि त्वया सह जीवन एवं प्रतीयते यदधुना क्षणमेकं व्यतीतम् स्वदाम्पत्यजीवनस्य सफलतां वर्णयन् कविः कथयति कति दिवसाः व्यतीता कति निशा निर्गता कियत्वर्षाणि व्यतीतानि न जानेऽहं तानि सर्वाणि तव निमिषयिते "क्षणवत्" व्यतीतानि। अर्थात् सर्वदा स्नेहमेवास्ति सुखवासः आसीत् गृहे। दुःखानुभूतिः कुत्रापि नासीत्। कविः रामवत् एकपत्नीव्रतमनुचरति तदैव कथयति वनवाटिकादिसमन्विताधरा सञ्चरतु सुदीर्घा वर्तते। रूपसौन्दर्ययुक्ताः अनेकाः कान्ताः सन्ति याः अभिराजं कामन्ते परमभिराजः मृगवत् (मृगः नवग्रासमिच्छति) तु स्वभार्यादृष्ट्या लालितः कुत्रापि न गतः अर्थात् यथा मृगशावकः कुशं त्यक्त्वा पूर्णवनं नाटति तथैवाचार्योऽपि स्वभार्यां त्यक्त्वा कुत्रापि न रमते।

आचार्यराजेन्द्रमिश्रः वर्तमानसमये यत्स्थानं भजते तत्र कोऽपि सहायकः नास्ति। सम्पूर्णजीवने यदर्चितं तत्सर्वं स्वपरिश्रमेणैव प्राप्तम् अत्र (अस्याम्) कोऽपि सहायकः (पताका) अल्पकालिक सहायकः (प्रकरी) न वर्तते। नाट्यशास्त्रे मुख्यनायकस्य सहायक (पताका) अल्पकालिकसहायकञ्च (प्रकरी) कथ्यते। साहित्यशास्त्रमृद्धृत्याचार्य स्वजीवनपरिश्रमं वर्णयन्ति।

स्वजीवनस्य विभुत्वं मयैव निर्व्यूढम्।
न वर्ततेऽत्र पताका न चाऽथवा प्रकरी।।[12]

आचार्योऽपि चतुरः जातः सः "शठे शाठ्यं समाचरेत्" आचरति तदैव तु कथयति अवसरनुकूलो मया व्यवहृत परिस्थितिमनुसृत्य सौम्यवानीरवृत्तिः धृतः समये आगते लौहवत् रूक्षता धृता। यदा दानदण्डभेदैः कार्यं न सिद्धं तु मया सामाश्रितः (वाण्याम् माधुर्यम् धृतम्)। आचार्यः पंकजवन्नं न व्यवहृतवान् (पङ्के जातेऽपि पङ्कं न स्पृशति) अर्थात् परिवारे उषित्वा तेषां यथासम्भवः सहायको अभवन्। आचार्यजीवने बहिर्लेपनं न वर्तते अर्थात् यथा बहिरतः दृश्यते तथैवात्मनापि व्यवह्रियते। अर्थात् (दिखावा) वैदुष्यप्रदर्शनं न कृतम्। कविवरः ईश्वरवद् भवितुं नार्हति स तु मानवोचितं व्यवहारं कृत्वा समाजे निवसितुमिच्छति। कवेरनेकेच्दाधुनाप्यपूर्णाः विद्यन्ते (वास्तविकत्या) परन्तु तथापि सः खिन्नो नास्ति यतो हि कविना ता इच्छाः काव्यत्वेन पूरिताः।

सौम्यवानीरवृत्तिः क्वचिद् वर्तिता।
आयसी रूक्षता क्वापि नित्यं धृता।।[13]

आचार्यः कथयति जीवने यदधीतं तस्य परिणामत्वेनेदमेव ज्ञातं यत् स्वाचरणैः जगति कमपि न क्लेदयेत्। अर्थात् आचार्येण स्वव्यवहारेण कदापि कथमपि केभ्योऽपि दुःखं न प्राददात्। कविः स्वजीवनं परहस्ते निक्षिप्तं मन्यते यद् व्यतीतं तन्मम नियतिः आसीत् यद्वर्तमानं वर्तते तत्गृहिणीसंकल्पे प्रतिष्ठितम् वर्तते भविष्यञ्च क्षेमेन्द्राधीनो दृश्यते क्षेमेन्द्रः आचार्यस्य पुत्रः वर्तते।[14]

कविजीवने सुखमल्पकालिकं मन्यते कविः। अत एव कथयति जगत्यस्मिन् मम सहचरस्तु दुःखमेव वर्तते। वैभवञ्च शाश्वतो कदापि न भवति। अर्थात् वैभवमल्पकालिकं भवति। तथापि जनाः मन अनुचरन्तः वैभवेऽपि दुःखमनुभवन्ति। अतः दुःखमेव सहचरो वर्तते।[15]

स्त्री 'भार्या' भवति भृयते सा भार्या 'यस्या भरणं क्रियते सा भार्या, भरणयति स भर्ता। कविरिदं साहित्यिकं वाक्यमनुचरन्तः दृश्यते अत एव

कथयति हे शुभे! त्वां प्राप्य द्वे कार्ये मां निबध्नीत: एकन्तु तव पालनाकांक्षा द्वितीयञ्च तवतृप्तेराकांक्षा।

किमन्यत्वामुपेत्य शुभेऽभिराजं द्वे निबध्नीत:।
तवैकासौ पिपालीयषाऽपरा चासौ तितर्पयिषा।।[16]

कवि: मनुष्य: वर्तते। स मनुष्य एव भवितुमिच्छति गुणैर्मनुष्य: देवत्वमाप्नोति। कवि: सर्वगुणसम्पन्नो वर्तते। अत: स: रसिकै: दीयमानाभि: प्रशंसाभि: दैवत्वं न प्राप्नुयात्। अत एव कवि: कथयति मनुजोऽहमस्मि मयि च मनुजता विद्यते क्षणार्थमुत्पन्ना 'विष्णुता' सम्भूता' तुभ्यमेव समर्पयामि। अर्थात् मनुष्यवद्व्यवहारं कर्तुं प्रयतते कवि: न तु शम्भूवत्।[17]
कवि: ईर्ष्यां प्रेम्णा नाशयितुं प्रयतते। अत एव कथयति अन्येषामीर्ष्यावटवृक्षोन्मीलयितुं तं (वटवृक्षं) मूलं प्रेम्णा पुन: पुन: सिञ्चितम् अर्थात् कविना सदैव सर्वै: सह (ईर्ष्यायुक्तान् प्रत्यपि) प्रेमयुक्तं व्यवहारं कृतम्। कृतघ्नै: अनेकधा व्यवहरित: आचार्य: कथयति अग्रिमजन्मनि न विस्मरेयमहं अत: पुन: पुन: तान् कृतघ्नान् अपश्यम्।[18]
प्राणरक्षकं क्वाथं निर्माणाय पदार्थं सहस्त्रधा विवर्तयते तथैव कविरपि स्वजीवनमनेकै: विवर्तै: परिपूर्णं मत्वा क्वाथोहमिति कथयति जीवनस्य नतोन्नतानि सहस्राणि विवर्तानि मया दृष्टानि। अत: समस्तरोगव्याधीनां हर्ता प्राणरक्षक: क्वाथोऽहं जातम्। अर्थात् आचार्येण स्वजीवनेऽनेकानि नतोन्नतानि विवर्तयुक्तानि सुखदु:खानि सोढानि।[19]
कविराजे मनसि देशं धर्मं भाषां प्रति पूर्णा श्रद्धा निदधाति मे गति: (अभिव्यक्ति:) भरतयाय वर्तते ममासक्ति: देववाण्यां सकृतभाषायां वर्तते मम च मति: भगवत्यां सरस्वत्यां वर्तते। तेषां (भारत, देववाणी, सरस्वती) भाग्ययुक्त: गृहसेवकोऽस्म्यहम्। देशसेवासरस्वत्याशीष: देवभाषाज्ञानञ्च भाग्येन लब्धमिति कवि: मति:। कवि: स्वाचरणेन कर्मणा व कथमपि कमपि सभयं न करोति अत एव कथपति मत्त: कोऽपि भययुक्त: न भवितव्य: यतोहि शङ्करोऽहम्' शम् (कल्याणं) करोतीति 'शङ्कर:' इति शाब्दिकार्थेन समेषां कल्याणमेव करोम्यहम्।[20]
कविजीवनमाडम्बरहीनं वर्तते तत्र दानं, मानं, व्रतं, जापं, तप:, दया, सेवा, सर्वत्र वर्तते परं जनेभ्यो दर्शनार्थं नैवापितु कर्मणा व्यवहारे विद्यन्ते। मनुष्य: आधिपत्यं स्थापयितुं गजाश्वान् विक्रीणीत्वा गजपति: (अधिपति:) भवति। परमाचार्यस्तु भगवत्या: मृडान्या: कमलवत् पादयो: रजं क्रीतम् तेन चाभवत् सम्राट् ''विद्या राजसु पूज्यते न हि धनम्'' अर्थात् कवि: विद्यया सम्राडभवत् 'कविराज:'

त्वया स्तम्बेरमा: क्रीता जगत्यां गजपतिर्जात:।
मृडानीपादपद्मरजांस्यंह क्रीत्वा नृपोऽभूवम्।।[21]

मनुष्या: धर्मशालां निर्माप्य सशुल्कं वासयन्ति जनान्। परं कविस्तु वटवृक्षवत् वर्तते य: चतुर्दिक्षु विस्तृतो वर्तते य: निराश्रिताणां कृते आश्रयमण्डपं वर्तते। यत्र कोऽपि समागत्य स्वश्रान्तिमपागमयति। कवित्वं प्रदर्शयितुं विद्वांस: शास्त्रीयपदबन्धयुक्तानि साहित्यानि रचयन्ति तेषामवबोधाय साहित्यशास्त्रज्ञानमावश्यकं वर्तते परं कविस्तु सरलमधुरै: गीतै: रससिद्ध: कवि: जात:। अर्थात् कवि: स्वसाहित्यं किल्ष्टपदबन्धयुक्तं न मन्यतेऽपितु सहृदये मनसि वासयोग्यं मन्यते।

कविना यद्प्राप्तं यथासमये न प्राप्तमत एव कथयति यत्पूर्वं प्राप्तव्यमासीदधुना प्राप्यते यत्साम्प्रतं प्राप्तव्यमस्ति तदग्रे कदा प्रापस्ये न जाने? मनुष्य: यावत् सुखमिच्छन् वर्तते तावदेव दु:खमाप्नोति परं यदा सुखेच्छा न स्यात्तु कुत्र विपदा: (दुखम्), मनुष्य: मन अनुचरति मनश्च तृष्णामनुचरति तृष्णा च कदापि शान्ता न याति ''तृष्णा न जीर्णा वयमेव जीर्णा'' यावत्पर्यन्तं कवि: धनमानामेच्छन् अजीवयत् तावत्पर्यन्तं सर्वत: दु:खानि समागतानि परन्तु यदेच्छाविहीनोऽभवत् तदा सर्वा: विपदा अपि अपागता। ''मनसि च परितुष्टे कोऽर्थवान् को दरिद्र:'' इत्यनुचरन् कवि: स्वजीवनमधुना जीवति।[22]
कवि: कमपि विशिष्टस्य सहृदयस्य कर्मणाहत: वर्तते। स: तं व्यंग्यन् स्वस्यापि वर्णनं करोति' मम पिपासा जलपानेन शान्ता गता। परं मदिरापायितायै पतनं वर्तत एव। अम्बुद: भूत्वोऽहन्तु आकाशे प्ररूढोऽभवम् परमधोगामिने तुभ्यं प्रयतनमेव वर्तते। मम स्थिरतायां निर्कम्पमाना: दीपका देदीप्यन्ते परं तवचक्रवाते प्रवात: एव तर्वते (सम्भवत: स्वपरिवारविषये कथयत्याचार्य: यत्र सर्वे सुखेन वसन्ति मत्कारणात्) ममोपाया: सज्जनाकांक्षापूर्णा सन्ति परं तवापाया: विघ्नयुक्ता: सन्ति। मम छवि समाजे विपदि बन्धुताया: परं त्वन्तु स्वहस्तनिर्मिता विधाता जाता। मया निर्मिता: कीर्तियशप्रसादा: त्वया तु पापगर्तानि निर्मितानि। मम स्वप्नेऽपि समागमनं (समत्वं) वर्तते परं तव स्वप्नदृष्टौ किराता: सन्ति (कलहम्)। मम सन्ध्या: चन्द्रिकया प्रज्ज्वलिता: परं तव निशा कदापि न गता अर्थात् पूर्णजीवनमन्धकारयुक्तं जातम् परं तव कवित्वाङ्कुराण्यपि न समुत्पन्नानि। सम्भवत: कवि: मित्रं बन्धुं वा खेदयन् गलज्जलिकामेषां लिखति।
निपीयाऽम्बु सद्यस्तृपा मे ऽपयाता।
सुरापायिनस्ते निपाता निपाता:।।[23]
गैरों में कहाँ दम था मुझे तो अपनों ने लूटा।
मेरी किस्ती वहाँ डूबी जहाँ पानी कम था।।
इत्यस्य परिणामो दृश्यते कवेर्जीवनं यत्र वैरिण: अन्ये (पराये) नासन् कवि: यान् स्वकीयं परिगणयति त एवाचार्यं तुदन्ति ह्य: येषां पादकण्टका: मयोत्पाटिता त एव कण्टकीभवन्त: माम् तुदन्ति (कांटे चुभा रहे हैं)-

ह्यो यदीयपादकण्टका: समुद्धता मया।
कण्टकीभवन्त एव ते तुदन्ति मामलम्।।[24]

कवि: कथयति तेन यज्जीवनं स्वार्थाय जीवितं तस्मिन् जीवनस्यसार्थकतामानुभवामि यतो हि यदा मया परार्थाय जीवितं जीवनमेनं तदा मया ज्ञातं ''जीवनं जीवितं मे''। अत एव कवि: कथयति स्वजीवने मया नर्तित:, रूदित:, आतिथ्यं स्वीकृतम्, परं यदा पराश्रु: मुषितं पथि भिक्षु भोजित: तदा मे जीवनं जीवितम्। गुणहीने पुत्रेऽऽसक्त: अभवम् परं प्रतिवेशिपुत्रगुणं प्रशंस्य जीवनं सार्थकं कृतम्। लज्जां त्यक्त्वा मया स्वयशोगाथा कथिता परं यदा हरिर्गुणगीतं तदा मे जीवनं सफलं धनं दत्तं तदा मे जीवनं सफलं कृतम्। मिथ्यावचसा मयान्ये सदा कदर्थिता: परं यदा स्वकलुषं चरित्रं श्रुतं तदा मे जीवनं सफलं जातम्। स्वर्गमृगप्राप्त्यर्थं (अभिलाषां इच्छां वा पूरयितुम्) मया किं किं न कृतम्? परं यदा स्वर्गमृणवत् (मारीचवत्) नाशित: तदा मे

जीवनं जीवनं कृतम्। आचार्यः स्वजीवनं धन्यं परोपकारकर्मण्येव मन्यते अन्यज्जीवनन्तु व्यर्थमेव व्यतीतम्।

स्वसुखे न किं परिनर्तितं, दुःखे न किं परिदेवितम्
मुषितं परन्तु यदाऽश्रु ते, नूनं तदेव दिनं दिनम्[25]

अस्माकं जीवनेऽनेकानि मित्राणि भवन्ति परन्तु सुहृदनेकानि न भवितुं शक्यन्ते यतो हि सुहृद् सः भवति यः सुखे दुःखे विपतौ वा सर्वदा सहायको भवति तस्मै स्वरहस्यान् कथयितुं संकोच न भवति। कविरपि सुहृदं विना स्वदुःखं कथयितुमसर्थसनुभवति, यः सुबन्धुः आसीत् सः वैदशिकोऽभूत् ये च पार्श्वे विद्यमानाः ते शत्रुवदाचरन्ति। अस्मिन् निर्वल्लभे रहिते क्षणे स्वमनोविपदां कस्मै निवेदयानि। आचार्यस्य सुहृद् राधावल्लभस्त्रिपाठी वर्तते ते बैंकास्थः जातः।[26]

आचार्याभिराजराजेन्द्रमिश्रस्य गलज्जलिकासाहित्यस्य समीक्षया वयं कथयितुं शक्नुमःयत् यथा यथाकाव्यं प्रवर्धितं तथा तथा काव्ये श्रेष्ठता समायाता। आत्मिकवर्णन पक्षेऽपि प्रथमकाव्ये (कनीनिकायां लेखनदृष्ट्या) आचार्यः उद्विग्नः वर्तते, परितः धूर्ताः वैरिणः अभावश्च कविहृदयं क्लेदयन्ति। तत्र जीवनस्य तत्क्षणं वर्णितं यत्र कविना केवलं सर्व दुःखमेव सोढम्। मत्तवारण्यां कविः किञ्चिदस्थिरो दृश्यते। अस्मिन्काले धनाभावः न वर्तते परं मानसिकवेदनाधुनापि न गता। शालभञ्जिकायां कविः जीवनस्य चरमोत्कर्षे विद्यते। अत्र सर्वविधानि सुखसाधनानि विद्यन्ते। मनोहरा भार्या गेहे रमते। सर्वत्रानन्दमेव दृश्यते हविर्धान्यां कविः जीवनस्यान्तिमायामे स्वकीयं मन्यते स्थितप्रज्ञ इव वर्तते जीवने कृतानि कर्माणि विचार्य अग्रिमजन्मनि गन्तुमुद्यतो दृश्यते कविराजः। अत एव हविर्धानी गलज्जलिकानया ''विश्वजित् यज्ञं वर्णयति यत्र पारलौकिकं कल्याणमनुगच्छति।

मयाऽयं विश्वजिद्यागोद्युसत्कृपयैव निर्व्यूढः।
प्रमाणत्वेन लोके प्रेक्ष्यतां सेयं हविर्धानी।।[27]

अत वयं कथयितुं शक्नुमः यदाचार्येण राजेन्द्रेण स्वगलज्जलिकाभिः स्वजीवनपरिचयं काव्यत्वेन प्रस्तुतं यत्र मानवजीवनस्य सर्व एव पक्षाः दुःखम्, मानः, सम्मानः, ग्लानिः, रोषः, साहसः, सहनशीलता, श्रेष्ठदाम्पत्यं, सुखादयः विद्यन्ते।

## सन्दर्भ ग्रंथ सूची


1. कनीनिका पृ. 110/2
2. ईशावास्योपनिषद् यजुर्वेद अ. 40/3
3. जीवनं वर्तते न हन्तव्यम् कनीनिका पृ. 22
4. जीवामि भूतलेऽहम् कनीनिका पृ. 36
5. न मया असाधु साधितम् कनीनिका पृ. 52
6. अभिराजगुणश्चन्दिरायते कनीनिका पृ. 54
7. क्वचिन्नास्ति सौश्यम् कनीनिका पृ. 78
8. सहसा प्रयातम् कनीनिका पृ. 80
9. धूमतां यामो वयम् कनीनिका पृ. 88
10. चिरं सोढम् चिरं सोढम् कनीनिका पृ. 90
11. मे मनो लग्नम् कनीनिका पृ. 98
12. दृष्टयैव ते दिवसायितम् कनीनिका पृ. 104
13. प्राणवलली याते नाग्निना सेचिता कनीनिका पृ. 130
14. उभयतोऽप्याहतं हृदयम् मत्तवारणी पृ. 30/ 10
15. द्वे निबध्नीतः मत्तवारणी पृ. 32/ 11
16. कथमिदं शक्यम् मत्तवारी पृ. 40/11
17. प्रभविष्णुता मत्तवारणी पृ. 44/ 8
18. भूरि भूरि मत्तवारणी पृ. 46
19. प्राण्दक्वाथोऽहम् मत्तवारणी पृ. 54
20. धाराधरोऽहम् मत्तवारणी पृ. 56/ 8, 9
21. रसिकद्विपोभूवम् मत्तवारणी पृ. 58
22. को नु दास्यत्युत्तरम् ? मत्तवारणी पृ. 70/ 89
23. निपाता निपाताः मत्तवारणी पृ. 100
24. तुदन्ति मामलम् मत्तवारणी पृ. 124
25. तुदन्ति मामलम् मत्तवारणी पृ. 124
26. उपालम्भा न दीयेरन् शालभञ्जिका पृ. 16/8, 9
27. हविर्धानी पृ. 130